# M.A. 4th Semester Examination, 2021
# SANSKRIT
# (Mahākāvya & Kāvyatattva)
# Paper: SNSK 402EB
# Course ID: 40952

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answer in their own words as far as practicable.*

**1. अधोलिखितेषु प्रश्नद्वयं समाधेयम् ।** **5× 2 = 10**

क) रसैः कथा यस्य सुधावधीरणी नलः स भूजानिरभूद् गुणाद्भुतः ।
सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः ॥ - व्याख्यायताम्।

ख) अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् ॥ - व्याख्यायताम्।

ग) नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः ।
दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यां दरकम्पिनी पपे ॥ - व्याख्यायताम्।

घ) धिगस्तु तृष्णातरलं भवन्मनः समीक्ष्य पक्षान् मम हेमजन्मनः ।
तवार्णवस्येव तुषारशीकरैर्भवेदमीभिः कमलोदयः कियान् ॥ - व्याख्यायताम्।

**2. पञ्च प्रश्नाः समाधेयाः ।** **2x5 = 10**

क) नैषधीयचरितम् इत्यस्य व्युत्पत्तिः निर्णेया ।

ख) नैषधीयचरितस्य नायकः कः ? स कीदृशः नायकः ?

ग) वृहत्त्रय्यां के के ग्रन्थाः अन्तर्गच्छन्ति ?

घ) "महसां महोज्ज्वलः" – इत्यत्र कोऽलंकारो विद्यते ?

ङ) काः चतुर्दश विद्याः ?

च) "रसैः कथा यस्य" – कस्य कथा वर्णिता? अत्र कीदृशी वर्णना विहिता?

छ) अश्वस्य वैशिष्ट्यं श्लोकेनैकेन प्रतिपाद्यताम् ।

**3. अधोनिर्दिष्टेषु चत्वारः प्रश्नाः समाधेयाः।** **5× 4 = 20**

क. समासेन उत्तमोत्तमकाव्यलक्षणं व्याख्यायताम्।

ख. यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वम् – व्याख्यायताम्।

ग. स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारवत्त्वमेव वा काव्यत्वम् – व्याख्यायताम्।

घ. शब्दार्थयोः काव्यत्वं जगन्नाथदिशा निराक्रियताम्।

ङ. यत्त्वास्वादोद्बोधकत्वमेव काव्यत्वप्रयोजकम् .... तन्न – व्याख्यायताम्।

च. किमर्थं काव्यलक्षणे गुणालङ्कारादिनिवेशोऽपि न युक्तः ?

छ. जगन्नाथदिशा प्रतिभायाः काव्यकारणत्वं निरूप्यताम्।